# भारतीयं मनोविज्ञानम्
# भासनाटकचक्रे व्यक्तित्वस्वरूपम्

डा. कुमारः बागेवाडिमठः
वरिष्ठ-शोधाध्येता
संस्कृत-संवर्धन-प्रतिष्ठानम्
kumararya33@gmail.com

(शोधसारांशः)

भारतम् अस्माकं देशः, एषा भूमिः कस्मिंश्चित् कालखण्डे ज्ञानेन संस्कृत्या च जगतीतले ख्यातनामा आसीत् । अस्मिन् एव देशे चतुष्षष्टिकलाः आविर्भूताः । तादृशीभिः ज्ञानसम्पद्भिः भरितं राष्ट्रम् अस्माकं भारतम् । अत्र ज्ञानस्य परमोत्कर्षं दृष्ट्वा बहुभ्यः देशेभ्यः जनाः आगत्य इतः ज्ञानं सम्पाद्य स्वराष्ट्रेषु वितीर्णवन्तः । विज्ञानादिषु क्षेत्रेषु अस्मदीयाः पूर्वजाः अतिरथमहारथाः आसन् । तेषां ज्ञानसम्पद् अधुना अपि जगतीतले देदीप्यते । मनोविज्ञानम् इति यद् वैदेशिकाः पृथक् रूपेण प्रतिपादयन्ति, तद् अस्माकं भारतीयानां ग्रन्थेषु सहजरूपेण उपलभ्यते । तत्रापि निदर्शनमात्रं कथनीयम् इति चेत् भगवतः श्रीकृष्णस्य मुखात् निसृता गीता मनोविज्ञानस्य परमोत्कृष्टं स्थानम् आवहति । नीतिग्रन्थाः, स्मृतयः, पञ्चतन्त्रम्, अर्थशास्त्रम्, आयुर्वेदग्रन्थाः, ज्योतिषादयः ग्रन्थाः शरीराकृतिदृष्ट्या, रोगदृष्ट्या, स्वभावदृष्ट्या, परिवेशदृष्ट्या, वंशानुक्रमदृष्ट्या, व्यवहारदृष्ट्या च मनुष्याणां प्राणिनां च व्यक्तित्वं श्लोकैः कथाभिः सुभाषितादिभिः निरूपयन्ति । विगतात् त्रिंशतः वर्षेभ्यः भारतीयाः वयं दास्यजीवनं यापयन्तः स्वात्मानं स्वसामर्थ्यं च विस्मृतवन्तः स्मः । भारते अद्यत्वे ये जन्म प्राप्नुवन्ति तेषु अत्यधिकाः शरीरेण भारतीयाः भवन्ति न तु मनसा । अतः अस्माकं ज्ञानराशिं ते जनाः नैव स्पृशन्ति । भारते अधुना ज्ञानस्य अभावः नास्ति परं तत् प्राप्तुं जनेषु मानसिकतायाः अभावः अस्ति । अतः तादृशस्य वैभवोपेतस्य ज्ञानस्य पुनरुज्जीवनाय संस्कृतम् इति एकः एव मार्गः अस्ति । तत् यदि सर्वः अपि भारतीयः अनुसरति तर्हि भारतं जगतीतले पुनः परमवैभवं प्राप्य विश्वगुरुः भविष्यति ।

व्यक्तित्वविषये संस्कृतग्रन्थेषु बहवः हि सिद्धान्ताः उपलभ्यन्ते तत्र अपि विशिष्य नाटकेषु, यतः पाश्चात्त्यानां मतानुसारं व्यक्तित्वं नाम 'छद्म' इति तत् च Persona इति Latin मूलपदात् स्वीक्रियते तर्हि अस्माकं सम्स्कृतनाटकेषु तादृशानि उदाहरणानि भूरिशः प्राप्तुं शक्नुमः एव । उदाहरणार्थं भरतस्य नाट्यशास्त्रे विश्वनाथस्य साहित्यदर्पणादिषु ग्रन्थेषु च बहुधा ज्ञातुं शक्नुमः ।

"व्यक्तिस्तु पृथगात्मता" (अमरकोशः) । जगति यावन्तः मानवाः सन्ति तावन्तः व्यक्तित्वप्रभेदाः सन्ति । अथापि सर्वे व्यक्तित्वं स्वाभिमतानुसारेण विभक्तवन्तः । पाश्चात्यैः व्यक्तित्वस्य विविधाः सिद्धान्ताः प्रतिपादिताः सन्ति । अत्र तावत् पाश्चात्त्यपौरात्ययोः साम्यं किञ्चित् प्रमाणेन प्रदर्शितम् अस्ति ।

**भारतीयपरम्परायां मुख्यतया व्यक्तित्वं द्विविधम् एव -**

**मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।**
**मनस्यन्यत् वचस्यन्यत् कर्मण्यन्यत् दुरात्मनाम् ॥**

एवं नैजं कल्पितं च इति द्विविधं व्यक्तित्वम् । तस्यैव ऋजुव्यक्तित्वम् अऋजुव्यक्तित्वम् इत्यपि वक्तुं शक्नुमः । यदा व्यक्तिः एकान्ते उत अत्यन्तम् आत्मीयैः सह भवति तदा तस्य नैजं व्यक्तित्वं प्रकाशते । सा एव व्यक्तिः यदा कस्यांश्चित् पदव्याम् अथवा अन्यैः जनैः सह भवति तदा तस्य कल्पितं व्यक्तित्वं बहिः दृश्यते । यथा - सुलभेन ज्ञातव्यं चेत् निर्वाचनसमये राजकीयाः नेतारः जनानां विश्वासं सम्पादयितुं छद्मवेषं धृत्वा अत्यन्तं जागरुकतया व्यवहरन्ति । तदा जनसेवकाः इव (तत्पुरुषसमासः) कार्यं कुर्वन्ति । निर्वाचनस्य समाप्तेः अनन्तरं जनसेवकाः (बहुव्रीहिसमासः) इव व्यवहरन्ति । अत्र वयं कल्पितं व्यक्तित्वं नैजं व्यक्तित्वं च स्पष्टं ज्ञातुं शक्नुमः । एतत् विहाय संस्कृतवाङ्मये व्यक्तित्वविषयकाः नैके विचाराः उपनिबद्धाः सन्ति ।

साहित्यदर्पणग्रन्थे विश्वनाथेन प्रत्येकं व्यक्तेः व्यक्तित्वचित्रणं कृतं दृश्यते -

**धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च ।**
**धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः ॥** (सा.द.३.३१)

नायकानां व्यक्तित्वम् अत्र प्रतिपादितम् अस्ति ।

**धीरोदात्तः -** **अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः ।**
**स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः ॥** (सा.द.३.३२)

यः आत्मनः श्लाघां न इच्छति, यः सर्वेषु क्षमागुणवान् अस्ति, यः महासत्त्वः अस्ति, सुखं दुःखं च समानं पश्यति, निगूढमानः, विनीतः छिन्नगर्वः दृढव्रतः अङ्गीकृतस्य निर्वाहकः च अस्ति सः । यथा - रामयुधिष्ठिरादयः ।

**धीरोद्धतः -** **मायापरः प्रचण्डश्चपलोऽहंकारदर्पभूयिष्ठः ।**
**आत्मश्लाघानिरतः धीरैर्धीरोद्धतः कथितः ॥** (सा.द.३.३३)

**धीरललितः धीरप्रशान्तश्च -**

**निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात् ।**
**सामान्यगुणैर्भूयात् द्विजादिको धीरशान्तः स्यात् ॥** (सा.द.३.३४)

एवं रीत्या वयं कतिचन व्यक्तित्वानि द्रष्टुं शक्नुमः । पाश्चात्त्यानां मतानुगुणं यदि चिन्तयामः तर्हि संस्कृतवाङ्मये भूरिशः उदाहरणानि उपलभ्यन्ते । तत्र भासनाटकस्थान् अंशान् परिशीलयामः, तथा हि -

**शुल्के विपणितं राज्यं पुत्रार्थे यदि याच्यते ।**
**तस्याः लोभोऽत्र नास्माकं भ्रातृराज्यापहारिणाम् ॥** (प्रति.१.१५)

Personality is the dynamic organization within the individual of those psycho-physical systems that determine his unique adjustment to his environment. (G.W. Allport)

**व्यवहारेण व्यक्तित्वनिरूपणम् -**

**अकारणं रूपमकारणं कुलं महत्सु नीचेषु च कर्म शोभते ।** (पञ्च.२.३३)

यदा कौरवाः विराट्-महाराजेन सह युद्धं कर्तुम् आगच्छन्ति तदा ब्रहन्नला उत्तरकुमारेण सह गत्वा कौरवान् पराजित्य विराड्राज्यं रक्षति तं विषयं ज्ञात्वा विराड्राजः बृहन्नलायाः वेषधारिणम् अर्जुनं दृष्ट्वा एतं वाक्यं वदति ।

Personality is defined as the characteristic set of behaviors, cognitions, and emotional patterns that evolve from biological and environmental factors.

**Trait theory of Allport (शीलगुणसिद्धान्तः)**

**धर्मो हि यत्नैः पुरुषेण साध्यो भुजङ्गजिह्वाचपला नृपश्रियः ।**
**तस्मात् प्रजापालनमात्रबुद्ध्या हतेषु देहेषु गुणा धरन्ते ॥** (कर्ण.१.१७)

- **Cardinal traits:** These are traits that dominate an individual's entire personality. Cardinal traits are thought to be quite rare.
- **Central traits:** Common traits that make up our personalities. Traits such as kindness, honesty, and friendliness are all examples of central traits.

**केशवः - कथं कथं मां दृष्ट्वा सम्भ्रान्ताः सर्वक्षत्रियाः । अलम् अलं सम्भ्रमेण । स्वैरम् आसतां भवन्तः ।**
**दुर्योधनः -** **उत्साहेन मतिं कृत्वाप्यासीनोऽस्मि समाहितः ।**
**केशवस्य प्रभावेण चलितोऽस्म्यासनादहम् ॥** (पञ्च० १७)

- **Secondary traits:** These are traits that are only present under certain conditions and circumstances. An example of a secondary trait would be getting nervous before delivering a speech to a large group of people.

**Constitutional theory of W.H Sheldon**

**सिंहाकृतिः कनकतालसमानबाहु-**
**र्मध्ये तनुर्गरुडपक्षविलिप्तपक्षः ।**
**विष्णुर्भवेद्विकसिताम्बुजपत्रनेत्रो**

**नेत्रे ममाहरति बन्धुरिवागतोऽयम् ॥** (मध्य.१.२७)

Sheldon proposed a theory about how there are certain body types ("somatotypes") that are associated with certain personality characteristics. He claimed that there are three such somatotypes: endomorphy, mesomorphy, and ectomorphy.

एवमेव संस्कृतवाङ्मये व्यक्तेः देहाकृतेः वर्णनेन एव तस्याः व्यक्तेः समग्रं व्यक्तित्वम् अभिज्ञातुं शक्नुमः । यथा - घटोत्कचस्य, भीमस्य, दुर्योधनादीनां च व्यक्तित्वं देहाकृत्या एव वर्णितम् अस्ति ।

**Needs theory of Murray – (40 Personality needs)**

Theory of personality that was organized in terms of motives, presses, and needs. Murray described needs as a "potentiality or readiness to respond in a certain way under certain given circumstances"

4 Motivational concepts in this theory -

1. Tension, 2. Need, 3.Press, 4.Thema

**त्वया राज्यैषिण्या नृपतिरसुभिर्नैव गणितः**
**सुतं ज्येष्ठं च त्वं व्रज वनमिति प्रेषितवती ।**
**न शीर्णं यद् दृष्ट्वा जनकतनयां वल्कलवती-**
**महो धात्रा सृष्टं भवति हृदयं वज्रकठिनम् ॥** (प्रति.३.२२)

अत्र कैकेय्याः मनसि तन्यता (Tension) वर्तते, यदि रामः राजा भवेत् तर्हि पुत्रस्य भरतस्य का वा गतिः इति । एवमेव पुत्राय राज्यप्राप्तिः भवेदिति राज्यैषिणा (Needs) अस्ति । तथैव मन्थरायाः प्रबलता (Press) अपि दरीदृश्यते । विषयः सन्दर्भः वा (Thema) राज्याभिषेकस्य अस्ति । एतैः कारणैः कैकेय्याः व्यक्तित्वं वयं स्पष्टतया ज्ञातुं शक्नुमः ।

**व्यक्तित्वे प्रभावोत्पादककारकाणि –**

**व्यक्तित्वे आनुवंशिकता -**

**पितुर्नियोगादहमागतो वनं न वत्स ! दर्पान्न भयान्न विभ्रमात् ।**
**कुलं च नः सत्यधनं ब्रवीमि ते कथं भवान् नीचपथे प्रवर्तते ॥** (प्रति.४.२०)

श्रीरामः भरतम् उद्दिश्य वदति यद् अस्माकं कुले जाताः सर्वे अपि सत्यधनाः सन्ति तादृशे कुले प्रसूतः अहं तेषाम् अनुसरणं करोमि । भरतः मार्गभ्रष्टः न भवेत् इत्यपि श्रीरामः स्मारयति ।

**इदं तद् स्त्रीमयं तेजो जातं क्षेत्रोदराद्धलात् ।**
**जनकस्य नृपेन्द्रस्य तपसः सन्निदर्शनम् ॥** (प्रति.४.१४)

एवमेव सीतायाः व्यक्तित्वम् अपि द्रष्टुं शक्नुमः ।

**जैवकीयकारकाणि (Biological factors)**

**सिंहास्यः सिंहदंष्ट्रो मधुनिभनयनः स्निग्धगम्भीरकण्ठो**
**बभ्रुभ्रूः श्येननासो द्विरदपत्रिहनुर्दीप्तविश्लिष्टकेशः ।**
**व्यूढोरा वज्रमध्यो गजवृषभगतिर्लम्बपीनांसबाहुः**
**संव्यक्तं राक्षसीजो विपुलबलयुतो लोकवीरस्य पुत्रः ॥** (मध्य.१.२६)

**पारिवारिककारकाणि (Family factors)**

**अत्युग्रदीप्तिविशदः समरेऽग्रगण्यः**
**शौर्ये च सम्प्रति सशोकमुपैति धीमान् ।**
**प्राप्ते निदाघसमये घनराशिरुद्धः**
**सूर्यः स्वभावरुचिमानिव भाति कर्णः ॥** (कर्ण.१.४)

सर्वदा युयुत्सुः कर्णः यदा स्वजन्मवृत्तान्तं कुन्त्या शृणोति तदा तस्य युयुत्सा एव नश्यति । ततः कुन्ती तस्मात् वचनम् अपि गृह्णाति । प्रायः अनेन एव कारणेन कर्णः युद्धे पराजयं प्राप्नोति ।

**धर्मः संस्कृतिः च (Dharma & Culture)**

**शिक्षा क्षयं गच्छति कालपर्ययात्**
**सुबद्धमूला निपतन्ति पादपाः ।**
**जलं जलस्थानगतं च शुश्यति**
**हुतं च दत्तं च तथैव तिष्ठति ।।** (कर्ण.१.२२)

एवम् अस्माकं धर्मः संस्कृतिः अपि व्यक्तित्वनिरूपणे प्राभावम् उत्पादयन्ति । अनेन एव खलु अधुना अपि कर्णः लोके दानशूरः इति प्रसिद्धः ।

एवं भारतीयसंस्कृतवाङ्मयेषु मनोवैज्ञानिकानि तत्त्वानि भूरिशः उपलभ्यन्ते । तेषां सङ्कलनं कृत्वा मनोवैज्ञानिकसिद्धान्तान् प्रतिपादयितुं शक्नुमः ।

**(एषः शोधसारांशः ""भासनाटकचक्रे प्रमुखाणां पात्राणां मनोवैज्ञानिकदृष्ट्या व्यक्तित्वाध्ययनम्"" इति विषयकस्य शोधस्य अस्ति । एतत् अनुसन्धानं विद्यावारिधेः उपाधेः कृते राष्ट्रियसंस्कृतविद्यापीठस्य अधीने २०१३ - २०१८ वर्षमध्ये कृतम् ।)**

**सङ्केताक्षरसूची -**

- सा.द० - साहित्यदर्पणः
- पञ्च० - पञ्चरात्रम्
- प्रति० - प्रतिमानाटकम्
- कर्ण० - कर्णभारम्
- मध्य० - मध्यमव्यायोगः
- आङ्ग्लस्य उद्धरणम् - उच्चतर शिक्षा मनोविज्ञान सिद्धान्त एवं व्यवहार

**परिशीलितग्रन्थसूची -**


1. सङ्कलनम् आचार्य बलदेव उपाध्यय -भासनाटकचक्रम् vol 2
2. एस्.पि गुप्ता & अलका गुप्ता -उच्चतर शिक्षा मनोविज्ञान सिद्धान्त एवं व्यवहार
3. कपिल, राजदत्त - अर्वाचीनमनोविज्ञानम् - वाराणसिसंस्कृतविश्वविद्यालय, वाराणसी
4. गुन्देचा, सङ्गीता - भास का रङ्गमञ्च - न्यू भारतीय बुक् कार्पोरेशन
5. जयसवालः, डा.सीतारामः - भारतीय मनोविज्ञान, आर्य बुक् डिपो, करोलबाग, नईदिल्ली
6. भोई, योगिन्द्र जीत - शिक्षामनोविज्ञान की रूपरेखा, विनोद पुस्तक मन्दर
7. शुक्ला, डा. श्रीमती लक्ष्मी - भारतीयमनोविज्ञान - ईस्टर्न ईस्टर्न् बुक् लिंकर्स
8. AGARAWAL, J. C. - Educational Research, Arya Book Depot, Karol Bagh, New Delhi
9. Bharathi, Dr. T – Personality Development - Neelkamal Publications New Delhi